Gyanshauryam, International Scientific Refereed Research Journal
© 2023 GISRRJ | Volume 6 | Issue 1 | ISSN : 2582-0095

# वेदार्थनिर्णये षडङ्गानामुपादेयता

Dr. D.Phani Yagneswara Yajulu
Asst Professor, Dept of Krishna Yajurveda, S.V.Vedic University, Tirupati.

**Article Info**
**Publication Issue :**
Volume 6, Issue 1
January-February-2023
**Page Number :** 100-103
**Article History**
Accepted : 01 Feb 2023
Published : 25 Feb 2023

**शोधसारांश:-** वेद: स्वयमेक: दुरुह: विषय: अस्ति। तदर्थज्ञाने,तस्य कर्मकाण्डस्य प्रतिपादने यानि उपयोगीनि शास्त्राणि सन्ति तान्येव वेदाङ्गानि भवन्ति। शब्दमयमन्त्राणां यथार्थोच्चारणाय प्रवृत्तं वेदाङ्गं शिक्षेत्यभिधीयते।वेदस्य मुख्यं प्रयोजनं तदुक्त कर्मकाण्डस्य यथावदनुष्ठानम्। अस्मिन् विषये उपयोगि अङ्गं भवति कल्प:। वेदानां रक्षकत्वात्, प्रकृतिप्रत्ययोपदेशशपुरस्सरं पदस्वरूपप्रतिपादकत्वात् वेदार्थावबोधने मुख्यत्वेन प्रयुक्तत्वाच्च व्याकरणं नितान्तमङ्गेषु श्रेष्ठं स्मृतम्। वैदिकपदानां व्युत्पादनं निरुक्तस्य विषयो वर्त्तते। अर्थावबोधनाय पदजातं यत्र निरुच्यते निश्शेषेणोपदिश्यते तन्निरुक्तमिति कथ्यते। वेदमन्त्रा: छन्दोबद्धा भवन्ति। तद्विषयक ज्ञानार्थं छन्दश्शास्त्रमपेक्षितं भवति। वेदोक्तकर्मानुष्ठानस्य उचित कालनिर्णयाय ज्योतिश्शास्त्रं नितरामपेक्षते। एतेषां ज्ञानं विना वेदस्य अर्थनिर्णय: दुष्करो भवति।

**कुंचिकाशब्दा:**-षडङ्ग:, पाठकगुणा:, पाठकाधमा:, शिक्षा, कल्प:, निरुक्त:, छन्द:, ज्यौतिष:, व्याकरणं, प्रातिशाख्य:, कल्पसूत्रं,वर्णाश्रमधर्मा:, आचारविचारा:, ब्रह्मलोक:।।

**प्रस्तावना-** सर्वस्मिन्नपि जगतीतले वेदानां स्थानं सर्वोपरि वर्तत इति सर्वेषाम् आस्तिकवरेण्यानां विदितचरमेव। भारतीयसंस्कृते: एवं जीवनपद्धत्याश्च मूलभूता: भवन्ति वेदा:। वेदानां प्राचीनतमत्वे, अपौरुषेयत्वे, सर्वस्यापि वाङ्मयस्य मूलभूतत्वे अत्यन्तमुपादेयत्वे,नित्यत्वे च नास्ति मनागपि संशयो विद्वत्तल्लजानाम्। वेदास्तु धर्ममूलतयैव सर्वथा समादृतास्सन्ति। अत एवोक्तम्- ''वेदोऽखिलो धर्ममूलम्, वेदा धर्मो हि निर्बभौ''[1] भारतीयविचारधाराया: दृढतमोऽयं विश्वास: यत् वेदतत्वज्ञो हि जन: ब्रह्मज्ञातुमर्हतीति। यथा–

वेदशास्त्रार्थतत्वज्ञ: यत्र कुत्राश्रमे वसन् ।
इहैव तिष्ठन् स ब्रह्मभूयाय कल्पते।।

वेदानां ज्ञानमन्तरा जीवनस्य अन्तिमं लक्ष्यं अधिगन्तुं न शक्यते।अत: वेदानां स्थानं महत्वपूर्णमस्ति। न केवलं भारतीयानाम् अपि तु सर्वासामपि मानवजातीनां हितसाधनाय विराजन्ते श्रुतय:। प्रकृते ''ब्राह्मणेन निष्कारणो धर्म: षडङ्गो वेदोऽध्येयो ज्ञेयश्च'' इति महाभाष्यकारोक्तरीत्या षडङ्गसहितवेदाध्ययनेन फलातिशय: शास्त्रेषु निश्चित:। वेदार्थावबोधनाय षडङ्गानि महर्षिभि: प्रणीतानि। ''अङ्ग्यन्ते ज्ञायन्ते अमीभिरित्यङ्गानि'' इति व्युत्पत्तिलभ्य: अर्थ: अङ्गशब्दस्य वर्त्तते।अर्थात् येन कस्यापि वस्तुन: स्वरूपज्ञाने साहाय्यं मिलति तमङ्गमिति कथ्यते। वेदस्य यथार्थज्ञानलाभाय एतेषां षण्णामङ्गानां ज्ञानमपेक्षितं भवति। तानि च अङ्गानि–

**Copyright:** © the author(s), publisher and licensee Shauryam Research Institute. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषामयनं चैव वेदाङ्गानि षडेवतु।।

एतानि क्रमशः विविच्यन्ते।

**1.शिक्षा-** तच्छास्त्रं येन वेदमन्त्राणाम् उच्चारणं शुद्धं सम्पाद्येत। वेदेषु स्वरस्य प्रधान्यं सर्वविदितम्।स्वरज्ञानं च शिक्षाधीनम्। अत एव इदं शिक्षाशास्त्रंवेदाङ्गम्। तैत्तिरीयोपनिषदि शिक्षायाः प्रयोजनम् इत्थं कथितं वर्त्तते। ''वर्ण स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तश्शीक्षाध्यायः।''[2] इति। तत्र वर्णः अकारादिः,उदात्तादिः स्वरः, ह्रस्वदीर्घादिका मात्रा,स्पृष्टत्वमित्यादिकः प्रयत्नः बलम्,अतिद्रुतत्वमतिविलम्बितत्वं च परिहृत्य यस्य यःकालः उचितःतावति काले तदुच्चारणं साम्यं तदेव साम शब्देनोच्यते। पूर्वोत्तर वर्णयोः संहिता सन्तानः। त एते वर्णादयः सन्तानान्ताः षडपि तत्तल्लक्षणलक्षिताः पठनीयाः। एतेषां सम्यक् ज्ञानाय इदं शास्त्रमवश्यमध्येयं भवति।

शिक्षा शास्त्रस्य अध्ययनेन कीदृशाःगुणाः भवन्ति तदभावे के दोषाः सम्भवन्तीत्यपि विवेचितं कुत्रचित् शिक्षा ग्रन्थेषु। यथा–

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थञ्च षडेते पाठकागुणाः ।।[3]
गीती शीघ्री शिरः कम्पी तथा लिखितपाठकाः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः।[4]

अतः पूर्वोदाहृतगुणप्राप्तये एवं दोषपरिहाराय च लक्ष्यभूतस्य वेदस्य शिक्षादिलक्षणग्रन्थान् अधीत्य यथावदुच्चारणं सम्पाद्य अध्येतारः सम्यक् फलं प्राप्नुयुः।

**2.व्याकरणम्-** ''मुखं व्याकरणं स्मृतम्''[5] इति पाणिनीयशिक्षायां यत् कथितमस्ति अर्थात् वेदस्य मुखस्थानीयमस्ति व्याकरणम्।व्याक्रियन्ते व्युत्पाद्यन्ते विविच्यन्ते शब्दा अनेनेति व्याकरणम्।इदं शास्त्रं तावत् द्वेधा दृश्यन्ते। एकं लौकिकव्याकरणम् अपरं वैदिकञ्च। लौकिकव्याकरणे तावत् मुनित्रयविरचिता अष्टाध्याय्यादि ग्रन्थाः सुप्रसिद्धा वर्तन्ते। वैदिकव्याकरणे प्रातिशाख्यादयः अन्तर्भवन्ति।

व्याकरणं विना पदानामवबोधः नैव भवितुमर्हति। अतः येन शास्त्रेण पदगत प्रकृतिप्रत्ययानाम् अवगतिः जायते तत् व्याकरणमिति कथ्यते। प्रकृतिप्रत्ययद्वारेणैव शब्दस्य अर्थनिर्णयः क्रियते।

वेदार्थानुशीलने अस्य शास्त्रस्य महत्वं सञ्जायते।शरीरे यथा मुखं सौन्दर्यभावाभिव्यञ्जकं भवति तथैव वेदार्थज्ञानस्य व्याकरणं साधनं विद्यते। अत एव व्याकरणं वेदपुरुषस्य मुखं कथितम्। वेदवाङ्मये व्याकरणशास्त्रस्य पारिभाषिकपदानाम् उपलब्धिः बहुत्र दृश्यते। यथा छान्दोग्योपनिषदि ''हिङ्कार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्समम्। आदिरिति द्व्यक्षरम्''[6]। तत्रैव ''अग्निरीकार आदित्य उकारो निहव एकारः''[7]इति अक्षर विषयकः सङ्केतः उपलभ्यते। एवमेव ''सर्वे स्वराः इन्द्रस्यात्मनः, सर्व ऊष्माणः प्रजापतेरात्मनः, सर्वे स्पर्शाः मृत्योरात्मनस्तं यदि स्वरेषूपालभेत इन्द्रं शरणम्''[8] इति उष्मणां स्वराणां च सङ्केताः प्राप्यन्ते।

**3.छन्दः-** छद् आच्छादने इति धातोः छन्दश्शब्दः निष्पाद्यते।यथाह निरुक्ते यास्कः – छन्दांसि छादनात्। कात्यायनेनापि छन्दसां लक्षणविषये एवमुक्तम् – यदक्षरपरिमाणं तच्छन्द इति।अर्थात् यत्र वर्णानां मात्राणां अथवा अक्षराणां संख्या निर्दिश्यते

तच्छन्दः उच्यते। अपि चैतत् विचारकस्य भावान् आच्छाद्य एकं विशिष्टं रुपं प्रयच्छति येन तच्छन्दः गेयं संपाद्यते। छन्दस्सु वर्तमान भिन्न-भिन्न संख्याकान् वर्णानाधारीकृत्य तेषां नामान्यपि भिन्नानि भवन्ति।

वैदिकछन्दसां विवरणं ऋक्प्रतिशाख्ये शाङ्खायनश्रौतसूत्रे सामवेदीय निदानसूत्रे पिङ्गलप्रणीत छन्दस्सूत्रे च लभ्यते।किन्तु पिङ्गलप्रणीत छन्दश्शास्त्रं केवलं छन्दोविषये मुख्यं स्थानमावहति। अत्र पूर्वोत्तरभागयोः क्रमेण वैदिक लौकिक छन्दसां विवरणं वर्त्तते। वेदानुशीलने इदं शास्त्रं महदुपकारकं भवति। इमानि मनोभावाभिव्यक्तेः रमणीयं रुचिकरं च साधनं भवति। छन्दांसि गेयानि भवन्ति। तेन श्रोतुः वक्तुश्च उभयोरपि श्रवणे कथने च आनन्दानुभूतिः जायते। मन्त्राः छन्दोबद्धा भवन्ति, अतः वेदाध्ययनाय छन्दोज्ञानं अत्यन्तमावश्यकं भवति। यथोक्तम्-

अविदित्वा ऋषिं छन्दो दैवतं योगमेव च।
योऽध्यापयेज्जपेद्वापि पापीयान् जायते तु सः।।[9]

**4.निरुक्तम्-** वेदस्य अर्थनिर्णये निरुक्तस्य महन्महत्वं वर्त्तते। यतो हि अनेन निरुक्तशास्त्रेण शब्दस्य मूल-स्वरूपं जायते। निरुक्तशब्दस्य अर्थः अस्ति निर्वचनं व्युत्पत्तिश्च। शब्दस्य उत्पत्तिः विकासः प्रक्रिया इत्यादयो विषयाः निरुक्तद्वारा ज्ञायन्ते। शब्दे प्रकृतिप्रत्ययोः स्पष्टीकरणं समानार्थकनानार्थकशब्दानां विवेचनं विना निरुक्तं न भवितुमर्हति। निरुक्ते वैदिकमन्त्राणां निर्वचनानि निर्वचनपरकव्याख्यानानि चोपलभ्यन्ते। वैदिकमन्त्रेषु उपदिष्टाः देवतावाचकशब्दाः यथा- अग्निवरुणेन्द्रसवित्रादीन् निर्वचनात्मक-शब्दान् विचिन्त्य तत्तद्देवतामन्त्रान् चतुर्धा विभज्य यास्केन अर्थो वर्णितः । निरुक्ते पदस्य विभागः नाम आख्यातः उपसर्गः निपातः इति भेदेन चतुर्धा कृतः। यथोक्तं निरुक्ते-''चत्वारि पदजातानि नामाख्या-तोपर्गनिपाताश्च''[10]।

**5.कल्पः-** वेदप्रतिपादित यज्ञादि विधिविधानं कल्पग्रन्थेषु प्रतिपादितमस्ति। अतः कल्पस्य वेदाध्ययने महती उपयोगिता वर्त्तते। अपि च यज्ञसम्बद्धसर्वविधीनां समर्थनं प्रतिपादनंच यत्र क्रियते तत् कल्पशास्त्रं कथ्यते। तथा च सायणाचार्यैः ''कल्प्यते समर्थ्यते यागप्रयोगोऽत्र'' इति कल्पशब्दो व्युत्पादितः।

कल्पसूत्रं तावत् चतुर्धा विभक्तमस्ति। यथा -

1. श्रौतसूत्रम्  2.गृह्यसूत्रम्  3. धर्मसूत्रम्  4. शुल्बसूत्रम्

**5.1. श्रौतसूत्रम्-** श्रुतेरिदं श्रौतम्।श्रौतसूत्रेषु वेदप्रतिपादितानां महायज्ञानां अग्निष्टोम- वाजपेय- राजसूय- अश्वमेधादि बृहद्यागानां दर्शपूर्णमासादि इष्टीनां च विस्तृतं विवरणं वर्त्तते।यज्ञविधीनां साङ्गोपाङ्ग-वर्णनमस्ति।

**5.2. गृह्यसूत्रम्-** गृहे भवं गृह्यम्। एतेषु सूत्रेषु गृहस्थधर्माणां यथा षोडशसंस्काराणां, पञ्चमहायज्ञानां, सप्तपाकयज्ञानां विध्यः वर्णिताः सन्ति। एवं च गृहनिर्माणादि विषयाः अपि निरूपिताः सन्ति।

**5.3. धर्मसूत्रम्-** आचारसम्बद्धाः ग्रन्थाः धर्मसूत्रेषु अन्तर्भवन्ति। अत्र वर्णाश्रमधर्माः, आचारविचाराः, मान्यताः, सामाजिक जीवनस्य च कर्तव्याकर्तव्यविषयाः समुपवर्णितास्सन्ति।

**5.4. शुल्बसूत्रम्-** अत्र वैज्ञानिकरीत्या शुद्धगणितस्य प्रतिपादनं कृतं वर्त्तते।एतेषु ज्यामिति सम्बन्धिनः नैके प्रमेयाः वर्णिता वर्तन्ते। इत्थं वेदार्थानुशीलने कल्पसूत्राणां महत्साहाय्यं वर्त्तते।

**6.ज्यौतिषम्-** शास्त्रमिदं द्विधा वर्त्तते। सिद्धान्तज्योतिषं फलितज्यौतिषं चेति। ऐहिकप्रयोजनप्राप्तये फलितज्यौतिषं प्रधानतया उपयुज्यते। कथं अस्य शास्त्रस्य वेदाङ्गत्वमित्याशङ्कायामुच्यते।

वेदा हि यज्ञार्थमभिप्रवृत्ताःकालानुपूर्वा विहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं यो ज्योज्येतिषं वेद से वेद यज्ञान्।।[11]

सर्वे वेदा तदुक्त यज्ञादि कर्मानुष्ठाने प्रवर्तन्ते।तदनुष्ठानं कालाधीनं भवति। यस्य यागस्य यः कालः उचितः तादृशकालनिर्णायकं शास्त्रमिदं भवति।

**उपसंहारः**- वेदस्य अतिगभीरार्थावबोधार्थम् इमानि वेदाङ्गानि प्रवृत्तानि सन्ति। वेदाङ्गकथनेनेदं स्पष्टं भवति यत् षडङ्गानां वेदैः सह वरिष्ठ सम्बन्धः अस्ति। यथोक्तम् पाणिनीयशिक्षायाम्-

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।[12]

अर्थात् वेदरूपस्य पुरुषस्य अङ्गविभाजने कथितं यत् छन्दः तस्य पादस्थानीयम्। हस्तौ कल्पस्थानीयौ। ज्योतिषं नेत्रौ,निरुक्तं कर्णस्थानीयं, शिक्षा नासिका कथिता,एवं मुखं व्याकरणं कीर्तितं वर्त्तते। चिन्तयामश्चेत् यथा अस्माकं शरीरे एकस्य अङ्गस्य अभावे जीवनं सुकरं न भवति। यथा नेत्रं विना द्रष्टुं न शक्यते, मुखेन विना भोक्तुं वक्तुं च न शक्येत, अतः सर्वेषामङ्गानां स्वस्व महिमानमस्ति। अतः वेदार्थानुशीलने एतेषां षण्णामङ्गानां महती उपयोगिता वर्त्तते। अत एवोक्तं - ''तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते'' इति।

## अन्त्यटिप्पणी

1.म.स्मृ
2.तै.उ 1.1.2
3.पा.शि
4.पा.शि
5.पा.शि
6.छान्दोग्ये 2/10
7.छान्दोग्य 1/13
8.छान्दोग्य 1/22-30
9.निरुक्तं 7-12
10.निरुक्तं 1.1
11.याजुष ज्यौतिषं 1.3
12.पा।शिक्षा 41-42